# विंशः पाठः

## नीतिरत्नानि

संस्कृतसाहित्ये नैतिकोपदेशाः प्रचुररूपेण प्राप्यन्ते। प्रायः प्रत्येकग्रन्थे नीत्यादर्शसदाचारादीनां शिक्षाः उपलभ्यन्ते। नीतिवाक्यं नास्ति केवलं साधारण-वाक्यरचना अपितु व्यवहारज्ञानरत्नमस्ति। यथा रत्नम् महर्घ्यम् महत्त्वपूर्णञ्च भवति, तद्वद् मानवजीवने नीतिवचनान्यपि जीवनरत्नानि भवन्ति। जीवनस्याधारः नीतिरपि भवति, इति विचार्यैव कतिपयानि विदुरनीतितः नीतिरत्नानि चयितानि। विदुरनीतिः महाभारतस्यांशः। विदुरः धृतराष्ट्रबन्धुः महान् प्रबुद्धश्चासीत्।

**बुद्ध्या भयं प्रणुदति तपसा विन्दते महत्।**
**गुरुशुश्रूषया ज्ञानं शान्तिं योगेन विन्दति ॥1॥**

**अन्वयः** – पुरुषः बुद्ध्या भयं प्रणुदति, तपसा महत् विन्दते, गुरुशुश्रूषया ज्ञानं (तथा) योगेन शान्तिं विन्दति।

**शब्दार्थः** – प्रणुदति – निराकरोति (दूर करता है), विदन्ति – प्राप्नोति (प्राप्त करता है),

**अष्टौ गुणाः पुरुषं दीपयन्ति**
**प्रज्ञा च कौल्यं च श्रुतं दमश्च।**
**पराक्रमश्चाबहुभाषिता च**
**दानं यथाशक्ति कृतज्ञता च ॥2॥**

**अन्वयः** – प्रज्ञा च कौल्यं च श्रुतं च दमः च पराक्रमः च अबहुभाषिता च यथाशक्ति दानं च कृतज्ञता च अष्टौ गुणाः पुरुषं दीपयन्ति।

**शब्दार्थः** – कौल्यम् – कुलीनता, श्रुतम् – बहुज्ञता (विद्या/ज्ञान), दीपयन्ति – द्योतयन्ति (प्रकाशित करते हैं / यश फैलाते हैं),

**अर्थसिद्धिं परामिच्छन् धर्ममेवादितश्चरेत्।**
**न हि धर्मादपैत्यर्थः स्वर्गलोकादिवामृतम् ॥3॥**

**अन्वयः** – पराम् अर्थसिद्धिम् इच्छन् (पुरुषः)आदितः धर्मम् एव चरेत्, स्वर्गलोकात् इव अमृतं (न अपैति तथैव) धर्मात् अर्थः न अपैति।

**शब्दार्थः** – अर्थसिद्धिम् – सम्पत्ति(सम्पत्ति की प्राप्ति), चरेत् – आचरेत् (आचरण करे), हि– निश्चयेन (निश्चयपूर्वक), अपैति – दूरं भवति (दूर होता है)

**धृतिः शमो दमः शौचं कारुण्यं वागनिष्ठुरा।**
**मित्राणां चानभिद्रोहः सप्तैता समिधः श्रियः ॥4॥**

**अन्वयः** – धृतिः शमो दमः शौचं कारुण्यम् अनिष्ठुरा वाक्, च मित्राणाम् अनभिद्रोहः एताः सप्तश्रियः समिधः (सन्ति)।

**शब्दार्थः** – अनिष्ठुरा – सुकोमला

**कृतज्ञं धार्मिकं सत्यमक्षुद्रं दृढभक्तिकम्।**

**जितेन्द्रियं स्थितं स्थित्यां मित्रमत्यागि चेष्यते॥5॥**

**अन्वयः** – कृतज्ञं धार्मिकं सत्यम् अक्षुद्रं दृढभक्तिकं जितेन्द्रियं स्थित्यां स्थितं च अत्यागि मित्रं इष्यते।

**शब्दार्थः** – इष्यते – काम्यते (चाहा जाता है)

**मार्दवं सर्वभूतानामनसूया क्षमा धृतिः॥**

**आयुष्याणि बुधाः प्राहुर्मित्राणां चाविमानना॥6॥**

**अन्वयः** – बुधाः सर्वभूतानां मार्दवं, अनसूया, क्षमा, धृतिः च मित्राणाम् अविमानना आयुष्याणि प्राहुः ।

**शब्दार्थः** – मार्दवम् – मृदुता (कोमलता) अविमानना – अपमानस्य अभावः(अपमान न करना), आयुष्याणि – आयुष्प्राप्ति साधनानि(आयु प्राप्त करने के साधन)

**मङ्गलालम्भनं योगः श्रुतमुत्थानमार्जवम्।**

**भूतिमेतानि कुर्वन्ति सतां चाभीक्ष्णदर्शनम् ॥7॥**

**अन्वयः** – योगः मङ्गलालम्भनम् उत्थानम् आर्जवं श्रुतम् च सताम् अभीक्ष्णदर्शनं एतानि भूतिं कुर्वन्ति।

**शब्दार्थः** – मङ्गलालम्भनम् – माङ्गलिकवस्तूना स्पर्शनम् (कुशादि माङ्गलिक वस्तुओं का स्पर्श करना), आर्जवम् – सरलता, अभीक्ष्णदर्शनम् – वारं वारं अवलोकनम् (बार बार देखना), भूतिम् – ऐश्वर्यम् (समृद्धि)

**कर्मणा मनसा वाचा यदभीक्ष्णं निषेवते।**

**तदेवापहरत्येनं तस्मात् कल्याणमाचरेत् ॥8॥**

**अन्वयः** – यत् कर्मणा मनसा वाचा अभीक्ष्णं निषेवते तत् एव एनम् (स्वाभीष्टम्) अपहरति तस्मात् कल्याणम् आचरेत्।

**शब्दार्थः** – अपहरति – अपहरणं करोति (दूर करता है)

**सत्यं रूपं श्रुतं विद्या कौल्यं शीलं बलं धनम्।**

**शौर्यं च चित्रभाष्यं व दशेमे स्वर्गयोनयः ॥9॥**

**अन्वयः** – सत्यम् रूपम् श्रुतम् विद्या कौल्यम् शीलम् बलम् धनम् शौर्यम् चित्रभाष्यम् च इमे दश स्वर्गयोनयः।

**शब्दार्थः** – चित्रभाष्यम् – वक्रोक्तिः (संवाद कौशल), स्वर्गयोनयः – स्वर्लोकस्य साधनानि (स्वर्ग लोक के साधन)

**वृद्धिः प्रभावस्तेजश्च सत्त्वमुत्थानमेव च।**

**व्यवसायश्च यस्य स्यात् तस्यावृत्तिभयं कुतः ॥10॥**

**अन्वयः** – यस्य वृद्धिः प्रभावः तेजसश्च सत्त्वम् उत्थानम् च व्यवसायः च स्यात् तस्य अवृत्तिभयम् एव कुतः?

**शब्दार्थः** – अवृत्तिभयम् – जीविकाभयम् (आजीविका का भय)

**अविसंवादको दक्षः कृतज्ञो मतिमानृजुः।**

**अपि संक्षीणकोशोऽपि लभते परिवारणम् ॥11॥**

**अन्वयः** – (यः) अविसंवादक दक्षः कृतज्ञः मतिमान् ऋजुः अपि च संक्षीणकोशः अपि परिवारणम् लभते।

**शब्दार्थः** – अविसंवादकः – अवितण्डावादी व्यर्थ वाद-विवादकर्त्ता (व्यर्थ बहस न करने वाला/अकुतर्की), ऋजुः – सरलः, संक्षीणकोशः – निर्धनः परिवारणम् – हस्त्यादि सम्पत्तियुक्तम् (हाथी आदि सम्पत्तियों से युक्त)

**उत्थानं संयमो दाक्ष्यमप्रमादो धृतिः स्मृतिः।**

**समीक्ष्य च समारम्भो विद्धि मूलं भवस्य तु ॥12॥**

**अन्वयः** – उत्थानम् संयमः दाक्ष्यम् अप्रमादः धृतिः स्मृतिः च समीक्ष्य समारम्भः तु भवस्य मूलं विद्धि।

**शब्दार्थः** – भवस्य – वैभवस्य (विभूति का), विद्धि – अवेहि (जानिए)

## अभ्यासः

1. **एकपदेन उत्तरत –**

(क) बुद्ध्या किं प्रणुदति?

(ख) कति गुणाः पुरुषं दीपयन्ति?

(ग) आदितः किं चरेत्?

(घ) काः समिधः श्रियः?

(ङ) 'दाक्ष्यम्' इत्यस्य शब्दस्य कोऽर्थः?

(च) संक्षीणकोशोऽपि किं लभते?

2. **एकवाक्येन उत्तरत –**

(क) के के गुणाः पुरुषं दीपयन्ति?

(ख) कानि भूतिं कुर्वन्ति?

(ग) किमर्थं कल्याणमाचरेत्?

(घ) स्वर्गयोनयः के?

(ङ) कस्यावृत्तिभयं नास्ति?

3. **त्रिचतुर्भिर्वाक्यैः उत्तरत –**

(क) कीदृशं मित्रम् काम्यते?

(ख) कति समिधः श्रियः?

(ग) कः संक्षीणकोशोऽपि परिवारणम् लभते?

(घ) ''उत्थानम्...............भवस्य तु।'' इत्यस्य श्लोकस्य भावार्थं लिखत।

4. **उचितं योजयत –**

| | (अ) | (ब) |
|---|---|---|
| (क) | गुरुशुश्रूषया | योगः |
| (ख) | अष्टौगुणाः पुरुषं | योगेन |
| (ग) | संक्षीणकोशोऽपि | दीपयन्ति |
| (घ) | शान्तिं विन्दति | परिवारणं लभते |
| (ङ) | मङ्गलालम्भनम् | ज्ञानम् |

5. **रिक्तस्थानानि पूरयत–**

(क) तपसा...................महत्।

(ख) ...............परामिच्छन्।

(ग) कर्मणा.............वाचा।

(घ) कृतज्ञं.............सत्यम्।

(ङ) ...........सर्वभूतानाम्

(च) सत्यं.............विद्या।

6. **नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत–**

(क) सत्यमक्षुद्रम्

(ख) सप्तैताः

(ग) कोशोऽपि

(घ) प्रभावस्तेजश्च

(ङ) मतिमानृजुः

7. **अधोलिखितपदानां मूलशब्दं लिङ्गं विभक्तिं वचनं च लिखत –**

| | | मूलशब्दः | विभक्तिः | वचनम् | लिङ्गः |
|---|---|---|---|---|---|
| (क) | बुद्ध्या | -------- | -------- | -------- | -------- |
| (ख) | योगेन | -------- | -------- | -------- | -------- |
| (ग) | ज्ञानम् | -------- | -------- | -------- | -------- |
| (घ) | बुधाः | -------- | -------- | -------- | -------- |
| (ङ) | सताम् | -------- | -------- | -------- | -------- |
| (च) | स्थित्याम् | -------- | -------- | -------- | -------- |
| (छ) | तस्मात् | -------- | -------- | -------- | -------- |
| (ज) | भवस्य | -------- | -------- | -------- | -------- |
| (झ) | एनम् | -------- | -------- | -------- | -------- |
| (ञ) | व्यवसायः | -------- | -------- | -------- | -------- |

8. **अधोलिखितानां श्लोकानामन्वयं कुरुत –**

(क) अष्टौ गुणाः....................कृतज्ञता च॥

(ख) अर्थसिद्धिं...............लोकादिवामृतम्॥

(ग) कृतज्ञं.............चेष्यते।।

(घ) मार्दवं................चाविमानना।।

(ङ) वृद्धिः प्रभावः............तस्यावृत्तिभयं कुतः॥

(च) उत्थानं...........भवस्य तु॥

9. **''नैतिकशिक्षा'' इति विषयमवलम्ब्य संस्कृतभाषायां दशवाक्यानि लिखत।**

## योग्यताविस्तारः –

- पाठे आगतान् नीतिश्लोकान् कण्ठस्थं कुरुत।
- पाठं विहाय त्रिंशत्संख्यकनीतिश्लोकानां सङ्ग्रहं कुरुत।
- नीतिश्लोकैः प्राप्तशिक्षां स्वजीवने धारयत।